दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् माघकृष्णनवमी
पौषः 28 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-81 | 1 | जनवरी 12, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 कीरतपुर- मनाली चतुष्पंक्तिमार्गे १२०० कोटिरूप्यकैः यात्रा सुरक्षिताभविष्यति, नदीतीरे रक्षाप्राचीराः स्थाप्यन्ते

3 इन्दिरागांधी-प्रियभगिनी-सुखसम्मान-निधियोजनाया: लंबितराशे: भुक्ति: शीघ्रमेव- मुख्यमंत्री सुक्खुः

6 स्वामीविवेकानन्दः : व्यक्तित्वं कृतित्वं च (जन्म12-02-1863-मृत्यु:04/07/1902) (राष्ट्रियुवादिवस:,जयंती विशेष:-12 जनवरी)


## राजकोट नगरे कच्छ-सौराष्ट्र-प्रदेशयोः कृते द्विदिवसीय वायब्रेन्ट-गुजरात-क्षेत्रीय-सम्मेलनस्य उद्घाटनानन्तरं सम्बोधितवान् प्रधानमन्त्री नरेन्द्रमोदी



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत्, महती वैश्विक अनिश्चितताासु भारतं अभूतपूर्वं निश्चिततायाः चरणं साक्ष्यं करोति यत् पूर्वं न दृष्टम् । राजकोट नगरे कच्छ-सौराष्ट्र-प्रदेशयोः कृते द्विदिवसीय वायब्रेन्ट-गुजरात-क्षेत्रीय-सम्मेलनस्य उद्घाटनानन्तरं श्रीमोदी सम्बोधयन् आसीत्। सः अवदत् यत्, भारतं विकसितराष्ट्र भवितुं द्रुतगत्या अग्रे गम्यमानः अस्ति, एतत् लक्ष्यं साधयितुं परिष्काराः महत्त्वपूर्णां भूमिकां निर्वहन्ति। प्रधानमन्त्री, भारते सौराष्ट्र-कच्छ-प्रदेशयोः च निवेशं कर्तुं उद्योगनेतृभ्यः आग्रहम् अकरोत्, निवेशार्थं इदमेव उचितः समयः इति वर्णितवान्। अस्मिन् अवसरे, प्रधानमन्त्रिणा सौराष्ट्रस्य सप्तमण्डलेषु त्रयोदश नूतनानि ग्रीन्फील्ड्-स्मार्ट-इण्डस्ट्रियल्-एस्टेट्-क्षेत्राणि उद्घाटितानि, सहैव राजकोट नगरे विशिष्टस्य चिकित्सा उपकरण-उद्यानस्य उद्घाटनम् अपि कृतम्। जनसमूहं सम्बोधयन् प्रधानमन्त्रिणा उक्तं यत्, अद्य वायब्रेण्ट् गुजरात् शिखरसम्मेलनं वैश्विकवृद्धेः, अन्ताराष्ट्रियसहयोगस्य, सहभागित्वस्य च सुदृढः मञ्चः अभवत्।

### स्वतन्त्रभारतस्य इतिहासे कदापि देशेन साम्प्रतिक आशां चैतन्यं च न दृष्टम् - मुकेश अम्बानी

अस्मिन् अवसरे भारतीय-कोट्यधिपति-व्यवसायिः तथा च रिलायन्स्-इण्डस्ट्रीस्-लिमिटेड् इत्यस्य अध्यक्षः प्रबन्धनिदेशकः च मुकेश अम्बानी गान्धीनगरे वायब्रेन्ट्-गुजरात् इत्यस्य विंशति-वर्षाणां सफलतायाः स्मरणार्थं आयोजिते सम्मेलने भाग-ग्रहणाय कृतज्ञतां प्रकटितवान्। प्रधानमन्त्रिणः मोदिनः प्रशंसां कुर्वन् सः अवदत् यत् स्वतन्त्रभारतस्य इतिहासे कदापि देशेन साम्प्रतिक आशां चैतन्यं च न दृष्टम् । भारतीय-कोट्यधिपति-व्यवसायि तथा वेल्स्पन्-वर्ल्ड इत्यस्य संस्थापकः अध्यक्षः च बालकृष्ण-गोपीराम्-गोयन्का-वर्यः अधोरेखितवान् यत् कच्छ-प्रदेशः विश्वस्य बृहत्तमायै गृह-वस्त्र-संस्थायै प्रसिद्धः भविष्यति। तेन गुजरातस्य मुखं नवीनीकर्तुं प्रधानमन्त्रिणः प्रयत्नान्, दूरदृष्टिम्, नेतृत्वम् च प्रशंसितम्। प्राप्तवार्तानुसारं सम्मेलनम् कच्छ-सौराष्ट्र-प्रदेशयोः कृते मञ्चरूपेण कार्यं करोति, यत्र मोरबी-नगरे सिरेमिक्स्, राजकोट-नगरे अभियान्त्रिकी, समुद्रतटस्य पार्श्वे विस्तृतानि नौकाश्रयानि, रसद-संपर्कजालम् इत्यादीनि महत्त्वपूर्णानि क्षेत्राणि लक्ष्यीकृतानि सन्ति। वैश्विक सहभागित्वस्य प्राधान्यता अस्ति यस्मिन् जापान-देशः, दक्षिणकोरिया-देशः, रवांडा-देशः, युक्रेन्-देशः च हरित ऊर्जायाः, पेट्रोरसायनस्य, कृषि-संस्करणस्य च अवसरान् अन्वेष्टुं सहभागि देशरूपेण भागं ग्रहीतवन्तः।

## बाङ्गलादेशे अन्यः एकः हिन्दुयुवकः मृतः, येन धार्मिकाल्पसंख्याकानां विरुद्धं हिंसायाः चिन्ता अधिका अभवत्



बाङ्गलादेशे अन्यः एकः हिन्दुयुवकः मृतः, येन धार्मिकाल्पसंख्याकानां विरुद्धं हिंसायाः चिन्ता अधिका अभवत्। सुनमगञ्जस्य डेराई उपमण्डले अवैतनिक-मोबाईल-देय-ऋण-मूल्यनां विवादस्य अनन्तरं शुक्रवासरे सिल्हट-नगरस्य एकस्मिन् चिकित्सालये विषं सेवनान्तरम् ऊनविंशति वर्षीयस्य जॉय-महापात्रायाः मृत्युः अभवत्। जॉय इत्यस्य परिवारेण आरोपितं यत् बुरहानपुर-ग्रामस्य आपणिकेन अमीरुल इस्लामेन क्रेडिट् इति माध्यमेन क्रीतस्य देयराशि-खण्डस्य विलम्बे सः ताडितः, अपमानितः, च।

## पूर्वप्रधानमन्त्रिणः लालबहादुर शास्त्रिणः पुण्यतिथिमाधृत्य उपराष्ट्रपतिः श्रद्धांजलिम् अयच्छत्

उपराष्ट्रपति सी.पी. राधाकृष्णनः पूर्वप्रधानमन्त्रिणः लालबहादुर शास्त्रिणः पुण्यतिथिमाधृत्य उपराष्ट्रपति एन्क्लेव इत्यत्र श्रद्धांजलिम् अयच्छत्। एकस्मिन् अन्तर्जालीय-संदेश माध्यमे उपराष्ट्रपतिः अवदत् यत् पूर्वप्रधानमन्त्री एकः दूरदर्शी नेता आसीत् यस्य जीवनं सरलतायाः, अखण्डतायाः, राष्ट्र प्रति अद्वितीय समर्पणस्य च उदाहरणम् आसीत्।



## उत्तरभारतस्य केषुचित् भागेषु शैत्यतरङ्गस्य पूर्वानुमानं प्रकटितम्



भारत-ऋतु-विज्ञान-विभागेन राजस्थान, दिल्ली, हरियाणा, चण्डीगढ, हिमाचल-प्रदेश, ओडिशा, पञ्जाब्-राज्यानां केषुचित् भागेषु शैत्यतरङ्गस्य पूर्वानुमानं प्रकटितम्। विभागस्य अनुसारं अद्य बिहार्-राज्ये शैत्यदिवसः भवितुम् अर्हति। आगामि दिनद्वयोः दिल्ल्यां, हरियाणायां, चण्डीगढे, पञ्जाबे, बिहारे, जम्मू-कश्मीरे, लद्दाखे, उपहिमालयीय-पश्चिमबङ्ग-प्रदेशे, सिक्किमे, उत्तरप्रदेशे, उत्तराखण्डे च केषुचित् भागेषु सघनस्य कुहराच्छादनस्य अनुमानम् ऋतु-विभागेन प्रकटितम्। अद्य राजस्थानस्य, दिल्ली-राज्यस्य, हरियाणा-राज्यस्य, चण्डीगढ-राज्यस्य,हिमाचल-प्रदेशस्य, ओडिशा-राज्यस्य, पञ्जाब्-राज्यस्य च केषुचित् भागेषु शैत्यतरङ्गस्य पूर्वानुमानं कृतम् अस्ति।

## सुभाषितम्

**एक एव सुहृद्धर्मो,
निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं,
सर्वमन्यद् हि गच्छति।।
-महासुभाषितसंग्रहः**

अर्थात्- मनुष्य की मृत्यु होने पर जैसे उसका शरीर नष्ट हो जाता है वैसे ही अन्य सभी वस्तुएं उसका साथ छोड देती हैं। परन्तु अपने जीवनकाल में किया हुआ धार्मिक आचरण ही मित्र के समान उसके मरणोपरान्त परलोक में साथ देता है।


दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सञ्चालिका- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## निर्वाचनमाधृत्य मिशन षडविंशत्यधिकद्विसहस्रतमवर्षम् इत्यस्य लोकार्पणं विहितवान् केन्द्रीय गृहमन्त्री अमितशाहः

केन्द्रीय गृहमन्त्री अमितशाहः तिरुवनंतपुरम् नगरे आगामी नगरपालिका निर्वाचनमाधृत्य मिशन षडविंशत्यधिकद्विसहस्रतमवर्षम् इत्यस्य लोकार्पणं विहितवान्। सः उक्तवान् यत् भारतीय जनता पार्टी इति दलम् विकसितकेरलस्य निर्माणार्थं कार्यं कुर्वद् अस्ति। अस्य दलस्य उद्देश्यं राज्ये भाजपेति दलस्य सत्तायाः शासनम् वर्तते। तिरुवनन्तपुरम् नगरे नगरपालिकानिर्वाचने निर्वाचितानां भाजपा-सदस्यानां राज्यसम्मेलने सः अवदत् यत् विकसितभारतस्य मार्गः विकसितकेरलात् अग्रेसरति।

# कीरतपुर- मनाली चतुष्पंक्तिमार्गे १२०० कोटिरूप्यकैः यात्रा सुरक्षिताभविष्यति, नदीतीरे रक्षाप्राचीराः स्थाप्यन्ते



हिमसंस्कृतवार्ताः- बिलासपुरम्।कीरतपुर-मनाली चतुष्पंक्तिमार्गे यात्रां सुरक्षितां सुगमां च कर्तुं प्रायः १२०० कोटिरूप्यकाणि व्ययीकर्तुं योजना निर्मिता अस्ति। अस्य योजनायाः अन्तर्गतं ब्यासनद्याः तीरे रक्षाप्राचीराणां निर्माणं, पर्वतढालानां दृढीकरणाय च व्यापकाः सुरक्षाकार्याः क्रियन्ते। अनेन मानसूनकाले वर्षाकाले च भवन्तः भूस्खलनं, मार्गकटावः, यातायातविघ्नाश्च महदंशेन न्यूनाः भविष्यन्ति। २०२३, २०२४ तथा २०२५ तमे वर्षे जातात् क्षतितः अनन्तरं इदानीं चतुष्पंक्तिमार्गस्य स्थायिसुरक्षायै विशेषः बलः दत्तः अस्ति।सर्वाधिकं कार्यं कुल्लूजनपदे प्रस्तावितम् अस्ति, यत्र प्रायः ७०० कोटिरूप्यकव्ययेन नदीतीरे सुरक्षाकार्याणि करिष्यन्ते। अत्र ब्यासानद्याः समीपे स्थितेषु भागेषु दृढप्रौद्योगिक्या रक्षाप्राचीराः निर्मीयन्ते। एताः प्राचीराः सार्ध- त्रि- चत्वारिमीटरपर्यन्तं नदीमध्ये गभीरतया स्थाप्यन्ते, येन तीव्रप्रवाहेऽपि मार्गस्य संरचनानां च क्षतिः न भविष्यति। कुल्लूतः मनालीपर्यन्तं प्रायः पञ्च-षट् किलोमीटरदीर्घे प्रदेशे नदीतीर- सुरक्षाकार्याणि प्रस्तावितानि सन्ति। अयं प्रदेशः भूस्खलनस्य कटावस्य च दृष्ट्या अत्यन्तं संवेदनशीलः मन्यते।बिलासपुरजनपदे प्रायः १०० कोटिरूप्यकव्ययेन रक्षाप्राचीरनिर्माणं पर्वत-सुरक्षाकार्याणि च करिष्यन्ते। अत्र मुख्यतया शैल-बोल्टिंग, जालस्थापनं च भविष्यति, येन भूस्खलनस्य जोखिमः न्यूनीकर्तुं शक्यते। मण्डीजनपदे तु प्रायः ४०० कोटिरूप्यकव्ययः नियोजितः अस्ति। अत्र मार्कण्डेयमन्दिरस्य थलौटप्रदेशे नदीतीरे, झलोगी-सुरुङ्गस्य बहिः आगतस्य मलबस्य निवारणं सहितं अन्यानि कार्याणि करिष्यन्ते। बिलासपुरजनपदे गड़ा-मोड़ात् बलोहपर्यन्तं पञ्चसु स्थानेषु सुरक्षा-कार्याणाम् आरम्भः अभवत्। पण्डोहात् मनालीपर्यन्तस्य भागस्य कृते निविदा-प्रक्रिया अद्यापि प्रचलति।

उल्लेखनीयं यत् २०२५ तमे वर्षे वर्षाकाले कीरतपुरात् मनालीपर्यन्तं चतुर्लेनमार्गे प्रायः ४० स्थानेषु गम्भीरा क्षतिः अभवत्। कुल्लूतः मनालीपर्यन्तं केषुचित् स्थानेषु चतुर्लेनमार्गस्य नामपि लुप्तम् आसीत्, तथापि अस्थायिरूपेण मार्गः पुनः स्थापितः। इदानीं स्थायी-सुरक्षाकार्येषु विशेषः ध्यानः दत्तः अस्ति।निविदा-प्रक्रिया पूर्णा भवति चेत् शेषेषु भागेषु अपि शीघ्रं कार्यारम्भः करिष्यते। निविदा-प्रक्रिया मुख्यालयतः सम्पाद्यते। आगामी-वर्षाकालात् पूर्वं मुख्यकार्यस्य समाप्तेः लक्ष्यं निश्चितम् अस्ति। विशेषतया नदीमध्ये गभीरतया क्रियमाणानि कार्याणि जलस्तरवृद्धेः पूर्वमेव पूर्णीकर्तुं प्रयत्नः क्रियते।

**वरुणचारी, परियोजना-निदेशकः, एनएचएआई पीआईयू मण्डी एककः**

# एचपीएसईबीएल-द्वारा विद्युत् विक्रयणात् ३०० कोटि-रूप्यकाणां राजस्वं अर्जितम्- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः

हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खु इत्यनेन उक्तं यत् हिमाचलप्रदेशराज्यविद्युत् बोर्डलिमिटेड (HPSEB) इत्यनेन २०२५ तमस्य वर्षस्य दिसम्बर मासस्य ३१ दिनाङ्कपर्यन्तं ३०० कोटिरूप्यकाणां राजस्वं प्राप्तम्, यदा तु २०२४ तमस्य वर्षस्य दिसम्बर मासस्य ३१ दिनाङ्कपर्यन्तं तस्यामेव अवधौ २०६ कोटिरूप्यकाणि प्राप्तानि। मुख्यमन्त्री उक्तवान् यत् एषा उपलब्धिः राज्यसर्वकारस्य "व्यवस्थापरिवर्तनं" नीतेः परिणामः अस्ति, यस्य उद्देश्यं शासनं पारदर्शकं, प्रभावी, जनसमर्थकं च कर्तुं वर्तते। सः अवदत् यत् परिष्कारैः, उत्तमवित्तीयप्रबन्धनेन, तथ्याधारितनिर्णयैः च विद्युत्क्षेत्रे दीर्घकालीनसमस्याः सम्बोधिताः, येन बोर्डस्य वित्तीयस्थितिः सुदृढा अभवत्।विद्युत्व्यवस्थायाः आधुनिकीकरणाय राज्यसर्वकारेण हिमाचलप्रदेशविद्युत्जालसंहिता कार्यान्विता, येन विद्युत्सञ्चालनं राष्ट्रियमानकानां अनुरूपं भवति एतेन जालसुरक्षा वर्धिता, सुचारुतया निर्बाधतया च विद्युतापूर्तिः सुनिश्चिता अभवत्। सः अपि अवदत् यत् उपभोक्तृणां सुविधायै शिमला-धर्मशाला-नगरयोः १.५ लक्षं स्मार्ट-मीटर इत्येतत् स्थापनं क्रियते। एतानि विद्युत्मापकयन्त्राणि उपभोक्तृभ्यः मोबाईल- एप- माध्यमेन स्वस्य दैनिक-विद्युत्-उपभोग-सूचनाः प्रादातुं शक्नुवन्ति। अपि च, काला अम्ब इत्यादिषु औद्योगिकक्षेत्रेषु एससीएडीए-व्यवस्थाः कार्यान्विताः सन्ति, येन विद्युत्-हानिः प्रायः ४ प्रतिशतं न्यूनीकृता अस्ति।मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारस्य डिजिटलपरिष्कारस्य परिणामेण अपि व्ययस्य रक्षणम् अभवत्। पुरातनं महत्त्वपूर्णं च अनुबन्धं समाप्तं कृत्वा पारदर्शी निविदाप्रक्रियाम् अङ्गीकृत्य विद्युत्बिलिङ्गस्य सूचनाप्रौद्योगिकीसेवानां च वार्षिकव्ययस्य ४६ प्रतिशतं न्यूनता अभवत् सः अवदत् यत् एचपीएसईबीएल-संस्थायाः क्षेत्रकर्मचारिणः एव तस्य महत्तमं बलम् अस्ति। तेषां प्रयत्नाः निर्बाधं विद्युतापूर्तिं सुनिश्चितं कुर्वन्ति, आपत्सु विद्युत्पुनर्स्थापनं च सक्षमं कुर्वन्ति। एतत् मनसि कृत्वा राज्यसर्वकारेण २१०० तः अधिकानां युवानां बोर्डस्य नियुक्तेः अनुमोदनं कृतम्, यत्र १,६०२ "विद्युत् उपभोक्तृमित्राणि" ५०० कनिष्ठ "टी- मेट" चैते सन्ति, येन पुनर्स्थापनकार्यं शीघ्रं भविष्यति, सेवासु परिष्कारः च भविष्यति।

मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारः आदिवासीक्षेत्रेषु विद्युतापूर्तेः सुदृढीकरणे विशेषं ध्यानं ददाति। किलाड़ उपत्यकायां नूतनानां विद्युत्रेखानां निर्माणं सहितं ₹६२ कोटिरूप्यकाणां परियोजनाः प्रचलन्ति। काजाक्षेत्रस्य दूरस्थेषु क्षेत्रेषु १४८ परिवारेभ्यः सौर-ऑफ-ग्रिड-प्रणाली प्रदत्ता अस्ति। तदतिरिक्तं चम्बामण्डलस्य पाङ्गीजनजातीयक्षेत्रे बैटरीभण्डारणप्रणालीयुक्ताः सौरपरियोजनाः (BESS) स्थापिताः सन्ति।

# IND vs NZ प्रथमः एकदिवसीयः : वडोदरानगरे भारतस्य रोमाञ्चकारी विजयः, न्यूजीलैण्डं चतुर्भिः स्तोभैः पराजितः



वडोदरानगरे प्रथमायां एकदिवसीयक्रीडायां भारतेन न्यूजीलैण्डदेशं चतुर्भिः स्तोभैः पराजितम् । प्रथमं फलकक्रीडां कुर्वन् न्यूजीलैण्ड्-देशः ५० चक्रेषु अष्टस्तोभैः-हाराय ३०० धावनाङ्कानां लक्ष्यं कृतवान् । तस्य प्रतिक्रियारूपेण भारतीयदलस्य आरम्भः उत्तमः अभवत्, परन्तु अन्तिमचक्रेषु नियमित-अन्तरालेषु स्तोभहान्या दलस्य दबावः जातः । परन्तु भारतं ४९ तमे चक्रे षट् स्तोभं कृते ३०६ अङ्कानां लक्ष्यं कृत्वा क्रीडायां विजयं प्राप्तवान् । भारतस्य कृते पूर्वनायकः कोहली ९३ धावनाङ्कैः सर्वाधिकं कृतवान् । भारतीय प्रथमक्रीडकः रोहित शर्मा २६ धावनाङ्कं, नायकः शुबमन गिल् ५६, श्रेयस अय्यरः ४९ , हर्षितराणा २९ धावनाङ्कान् च कृतवान् । राहुलः हर्षितः ततः आहतः सुन्दरः च सह अन्तिमचक्रेषु दलस्य विजये महत्त्वपूर्णां भूमिकां निर्वहति स्म ।

## रोहितः गेलस्य अभिलेखं भङ्गितवान्

रोहितशर्मा एकदिवसीयक्रीडासु सर्वाधिकं षट्कं कृत्वा उद्घाटकः अभवत् यदा सः न्यूजीलैण्डविरुद्धं द्वितीयं षट्कं कृतवान् । सः वेस्ट् इन्डीज-क्लबस्य क्रिस गेलस्य ३२८ षट्-अङ्कस्य अभिलेखं भङ्गं कृतवान् । अधुना रोहितस्य १९३ एकदिवसीयक्रीडासु प्रथमक्रमाङ्कस्य क्रीडकेषु ३२९ षट्काः सन्ति । एतावता तस्य नाम्ना ३५७ षट्काः सन्ति ।

## विराट् सचिन, सङ्गक्करा च अतिक्रम्य २८,००० अन्तर्राष्ट्रीयधावनं सर्वाधिकं शीघ्रं प्राप्नोति

भारतीयक्रिकेटदलस्य पुरातनः फलकक्रीडकः विराट्कोहली अपरं ऐतिहासिकं पराक्रमं प्राप्तवान् । न्यूजीलैण्ड्-विरुद्धायां प्रथमायां एकदिवसीयक्रीडायां २५ धावनाङ्कान् कृत्वा एव सः अन्तर्राष्ट्रीयक्रिकेट्-क्रीडायां २८,००० धावनाङ्कं प्राप्तुं विश्वस्य द्रुततमः फलकक्रीडकः अभवत् । विराट् अल्पतमसमये (६२४ पारी) एतत् माइलस्टोन् प्राप्तवान्, यत् विश्वविक्रमः अस्ति । क्रीडाकाले विराट् ४४ कन्दुकेषु अर्धशतकं प्राप्तवान् । स्वस्य क्रीडायां विराट् ९१ कन्दुकेषु ९३ धावनाङ्कानां लक्ष्यं कृतवान् । सः एतावता ३०९ एकदिवसीयक्रीडासु १४,६५० धावनाङ्कान् कृतवान्, यत्र ५३ शतकानि, ७७ अर्धशतकानि च सन्ति ।

# मण्डीशिवरात्रिमहोत्सवे केवलं पञ्जीकृतदेवतानां पूजनं भविष्यति, यतः पड्डलस्थलं देवानां कृते अतिलघु अभवत्



हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी। मण्डी शिवरात्रि महोत्सवे केवलं पंजीकृतदेवतानां पूजनं भविष्यति। आयोजनस्थले देवतानां कृते आयोजनस्थलस्थानम् अतिलघुः जातं ततः परं १०० तः अधिकानां नूतनानां देवतानां पञ्जीकरणं स्थगितम् अस्ति। सर्वदेवतासमितिः पञ्जीकरणप्रक्रियायाः निवृत्ता अस्ति, तस्मात् बहिः आगच्छतां देवतानां व्यवस्थापनस्य प्रभारी मण्डी उपायुक्तः अस्ति। मण्डीशिवरात्रिमहोत्सवे २१६ देवताः आमन्त्रिताः सन्ति, तेषु १९० तः अधिकाः महोत्सवस्य भव्यतां वर्धयितुं आगच्छन्ति। अस्मिन् समये ते एव देवताः आमन्त्रिताः सन्ति, परन्तु पञ्जीकरणार्थं पङ्क्तौ प्रतीक्षमाणानां शताधिकदेवतानाम् उपस्थित्या भ्रमः वर्धितः।

### सिरमौरशिमलाकुल्लुतः देवताः आगच्छन्ति-

यथा यथा मण्डीशिवरात्रिमहोत्सवः वर्धते तथा तथा राजपुत्रयुगस्य देवतानाम् अतिरिक्तं अन्यजनपदेभ्यः देवताः अधुना आगच्छन्ति। सिरमौर- शिमला- कुल्लु-क्षेत्रेभ्यः देवताः आगच्छन्ति।

### १०० नूतनदेवतानां पञ्जीकरणे विलम्ब-

मण्डी शिवरात्रिमहोत्सवस्य कृते नूतनदेवताः पञ्जीकरणं न करिष्यति। सर्वदेवतासमितेः प्रमुखः पंडितशिवपालशर्मा कथयति यत् शताधिकदेवताः पञ्जीकरणं याचन्ते। पड्डलप्राङ्गणे पूर्वमेव आमन्त्रिताः देवताः पर्याप्तं स्थानं, सम्मानं च न प्राप्नुवन्ति। एतादृशे सति कथमनिमन्त्रितदेवताः समावृताः। यदि मण्डीजनपदस्य उपायुक्तः इच्छति तर्हि सः आमन्त्रणं विना आगतानां देवतानां व्यवस्थां कर्तुं शक्नोति।

# इन्दिरागांधी-प्रियभगिनी-सुखसम्मान-निधियोजनायाः लंबितराशेः भुक्तिः शीघ्रमेव- मुख्यमंत्री सुक्खुः




मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः इन्दिरागांधी-प्रियभगिनी- सुखसम्मान-निधियोजनायाः अन्तर्गतं लंबितराशेः भुक्तिः शीघ्रं कर्तुं निर्देशं दत्तवान्। सः पाङ्गी, लाहौल-स्पीतिः, डोडराक्वार, कुपवी इत्यादिषु दूरस्थेषु आदिवासीक्षेत्रेषु निवसतां जनानां कृते सामाजिकसुरक्षावृत्तेः लाभाय विशेषं ध्यानं दातुम् अपि आह्वानं कृतवान्।सुक्खुः अवदत् यत् राज्यसर्वकारः अपाङ्गजनानाम् कल्याणार्थं व्यापकं समावेशी च समर्थनरूपरेखां अपि विकासयति। आयसीमायाः विना विकलांगताश्रयवृत्तिं प्रदातुं सार्वभौमिकप्रवेशः सुनिश्चितः अस्ति। विकलाङ्गजनाः ₹१,१५० तः ₹१,७०० पर्यन्तं मासिकं पेन्शनं प्राप्नुवन्ति। सः अवदत् यत् शिक्षाक्षेत्रे ₹६२५ तः ₹५००० पर्यन्तं मासिकं छात्रवृत्तिः विकलाङ्गानाम् छात्राणां कृते आयसीमा विना प्रदत्ता अस्ति, येन ३१०० छात्राः लाभान्विताः भवन्ति, ₹३.७७ कोटिरूप्यकाणां राशिः च वितरिता अस्ति।मुख्यमन्त्री सुक्खुः अवदत् यत् विकलाङ्गानाम् विवाहाय २५,००० तः ५०,००० यावत् विवाहप्रोत्साहनानुदानं प्रदत्तं भवति। एतावता २१२ लाभार्थिभ्यः ७४.४९ लक्षरूप्यकाणां सहायता प्रदत्ता अस्ति। विशेषगृहेषु वृद्धाश्रमेषु च निवसतां विकलाङ्गानाम्, वरिष्ठनागरिकाणां च प्रमुखमहोत्सवेषु प्रतिव्यक्तिं ५०० रुप्यकाणाम् उत्सवानुदानं प्रदत्तं भवति, यत् २,१२८ लाभार्थिभ्यः आहत्य ७५.४३ लक्षरूप्यकाणि भवति।

# प्रधानमन्त्री मोदी नागरिकैः एकत्रीभूय देशस्य विभाजनार्थं षड्यंत्रं कुर्वाणः सर्वासां शक्तिनां पराजयितुं आहूतवान्

इतः पूर्वं, गुजरातराज्यस्य यात्रायाः द्वितीये दिवसे प्रधानमन्त्री मोदी राजकोट-नगरे वाइब्रेंट गुजरात ट्रेड एग्जिबिशन इत्यस्य उद्घाटनं विहितवान् । अष्टादशसहस्र वर्ग मीटरमितस्य विशाल क्षेत्रे प्रसारिता एषा भव्यप्रदर्शनी विकास नवीनीकरणस्य च जीवन्तं उदाहरणम् अस्ति। कृषिः, खाद्य प्रसंस्करणम्, मत्स्यपालनं, रक्षा, ऊर्जा, पेट्रोकेमिकल्स, लॉजिस्टिक्स चेत्यादिषु क्षेत्रेषु स्व अत्याधुनिक क्षमतानां प्रदर्शयितुं चतुस्शततः अधिकाः प्रदर्शकाः नगरे एकत्रिताः सन्ति। एतदतिरिच्य टॉरेंट पावर लिमिटेड, कोसोल, अडानी ग्रीन, एस्सार ग्रुप, चेत्यादयः समवायाः सम्मिलिताः सन्ति। अद्य प्रातः प्रधानमन्त्री नरेन्द्रमोदी सोमनाथमण्डलस्य प्रभासपाटन क्षेत्रे ऐतिहासिके सोमनाथ स्वाभिमानपर्वे भागं गृहीतवान्। अस्मिन् अवसरे श्री मोदी भव्य शौर्य-यात्रायाः नेतृत्वं कृतवान्। सोमनाथ मन्दिरस्य रक्षणं कुर्वन्तः असंख्य-योद्धानां कृते श्रद्धांजलिं समर्पयितुं अष्टोत्तरैकशत संख्यकानां अश्वानाम् शोभायात्रा आयोजिता। आदेशात् सहस्राधिकाः श्रद्धालवः अस्यां शोभायात्रायां भागं गृहीतवन्तः। अस्मिन् अवसरे एकां जनसभां सम्बोधयता प्रधानमन्त्री मोदी नागरिकैः एकत्रीभूय देशस्य विभाजनार्थं षड्यंत्रं कुर्वाणः सर्वासां शक्तिनां पराजयितुं आहूतवान् ।

# काङ्ग्रेसकार्यकर्तारः अपि सुखस्य सर्वकारे दुःखिताः- जयरामठाकुरः "मुख्यमंत्री स्वस्य कार्यैः कियत् सन्तुष्टः इत्यपि संशयः अस्ति"




हिमसंस्कृतवार्ताः- ऊना। हिमाचलप्रदेशस्य पूर्वमुख्यमन्त्री विपक्षनेता च जयरामठाकुरः रविवासरे ऊनामण्डलस्य प्रवासकाले राज्यस्य काङ्ग्रेससर्वकारं लक्ष्यं कृतवान्। सः अवदत् यत् सत्तां प्राप्तेः पूर्वं काङ्ग्रेसपक्षेण व्यवस्थापरिवर्तनस्य, सुखस्य च सर्वकारस्य घोषाः उत्थापिताः, परन्तु वर्षत्रयानन्तरं राज्यस्य चित्रं सर्वथा निराशाजनकं दृश्यते।अत्र पत्रकारैः सह वदन् जयरामठाकुरः अवदत् यत् एतेषु वर्षत्रयेषु राज्ये यत् प्रशासनिकं अव्यवस्था अराजकता च प्रसृतं तत् हिमाचलस्य इतिहासे अपूर्वम् अस्ति। सः अवदत् यत् सुखस्य सर्वकारः इति विश्वासं कुर्वतः काङ्ग्रेसस्य अधीनं स्वस्य कार्यकर्तारः अपि सुखम् अनुभवितुं असमर्थाः सन्ति, यदा तु मुख्यमन्त्री स्वसर्वकारेण कियत् सन्तुष्टः इत्यपि संशयः अस्ति।

### ये संविधानम् आलोचितवन्तः ते इदानीं तस्य उद्धरणं ददति

मनरेगा विषये काङ्ग्रेसेन राज्यसर्वकारेण च विरोधस्य विषये विपक्षनेता उक्तवान् यत् ये संविधानस्य सर्वाधिकम् आलोचनां कृतवन्तः ते अधुना तस्य उद्धरणं दत्त्वा जनसमूहं भ्रामयन्ति। सः आरोपितवान् यत् मुख्यमन्त्री, मन्त्रिणः, विधायकाः च केवलं स्वराजनैतिकसन्निधिं निर्वोढुम् एव केन्द्रसर्वकारस्य विरुद्धं विरोधान् कुर्वन्ति।

## केन्द्रसर्वकारः मनरेगां न समापयति

जयरामठाकुरः स्पष्टीकृतवान् यत् केन्द्रसर्वकारः मनरेगां न समापयति, अपि तु योजनाम् अधिकं प्रभावीकर्तुं तस्मिन् सकारात्मकपरिवर्तनं कुर्वन् अस्ति।

### पंचायतनिर्वाचने मुख्यमंत्रिणः प्रतिक्रिया दुर्भाग्यपूर्णा

पंचायतीराजसंस्थानिर्वाचनसम्बद्धे आपदाविधानस्य उल्लेखं कृत्वा काङ्ग्रेससर्वकारस्य आलोचना अपि जयरामठाकुरः अकरोत्। सः अवदत् यत् सप्तमासपूर्वं एषा आपदा अभवत्, परन्तु काङ्ग्रेसपक्षस्य सत्तां प्राप्तमात्रेण सम्पूर्णं राज्यम् आपदाग्रस्तं राज्यं घोषितम्। सः उच्चन्यायालयस्य ३० एप्रिलतः पूर्वं निर्वाचनं कर्तुम् आदेशम् उद्धृत्य मुख्यमन्त्रिणः प्रतिक्रिया दुर्भाग्यपूर्णा इति उक्तवान्। विपक्षनेता आग्रहं कृतवान् यत् सर्वकारः प्रकटयतु यत् वास्तवतः कति जनाः आपदाप्रभाविताः जनाः आश्रयं प्राप्तवन्तः। सः अवदत् यत् एकतः कार्यं परिहर्तुं सर्वकारः आपदाविधानस्य आश्रयं गृह्णाति, अपरतः तु स्वस्य त्रिवर्षीयं वार्षिकोत्सवम् आचरति। एतत् प्रत्यक्षं जनस्य वञ्चनम् अस्ति।

### श्रीमद्-विजयरत्न-सुन्दर-सुरीश्वरजी महाराज्ञा ज्ञानं केवलं पुस्तकेषु एव सीमितं न कृतम्, अपितु स्वस्य जीवने तत् प्रदर्शितम्-प्रधानमन्त्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् श्रीमद्-विजयरत्न-सुन्दर्-सुरीश्वरजी महाराज्ञा ज्ञानं केवलं पुस्तकेषु एव सीमितं न कृतम्, अपितु स्वस्य जीवने तत् प्रदर्शितम्, सः अन्यान् अपि एवं कर्तुं प्रेरयत्। आध्यात्मिक-गुरुः जैन भिक्षुः च श्रीमद-विजयरत्न-सुन्दर-सुरीश्वरजी महाराज्ञः पञ्च-शत-तमस्य पुस्तकस्य विमोचने स्वस्य चलचित्र-सन्देशे श्रीमोदी अवदत् यत्, तस्य व्यक्तित्वं आत्मनियन्त्रणस्य, सरलतायाः, स्पष्टतायाः च अद्भुतम् मिश्रणम् अस्ति इति।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य पूर्वक्षेत्रीय १५ तमयुवमहोत्सवः

## श्रीसीताराम- वैदिकादर्श- संस्कृत- महाविद्यालयस्य आयोजकेन सम्पन्नः जातः





**हिमसंस्कृतवार्ता डॉ. निशिकान्तपाण्डेयः, कोलकाता, पश्चिमबङ्गः।** केन्द्रीय- संस्कृत- विश्वविद्यालयेन विद्यार्थिनां कौशलाभिवृद्धये प्रतिभाविकासाय च आवर्षं नैके शैक्षणिक- सांस्कृतिक- क्रीडात्मकाः कार्यक्रमाः परिचाल्यन्ते। तेषु स्पर्धात्मकः अयं युवमहोत्सवः आन्यतम्यं भजते। केन्द्रीयसंस्कृतविश्वविद्यालयस्य मान्यानां कुलपतिवर्याणां प्रो. श्रीनिवासवरखेडिमहाभागानां मनीषया ऐषमः युवमहोत्सवस्य परिपालनावसरः प्रप्रथमतया आदर्शसंस्कृतमहाविद्यालयेभ्यः प्रदत्तः इति महदानन्दसन्दोहं जनयति। पूर्वक्षेत्रीयस्य युवमहोत्सवस्य समायोजनावसरः श्रीसीताराम- वैदिकादर्श- संस्कृत- महाविद्यालयेन सम्प्राप्त इति परमसौभाग्यास्पदम्। अस्मिन् पूर्वक्षेत्रीये युवमहोत्सवे षड्भ्यः राज्येभ्यः प्रतिभागिनः विविधासु स्पर्धासु भागम् अगृह्णन्। तानि तावत्– १. पश्चिमबङ्गः २. बिहारः ३. झारखण्डः ४. ओडिशा ५. मणिपुरम् ६. त्रिपुरा। तत्तद्राज्येभ्यः समागताः परिसराः महाविद्यालयाश्च तावत् १. श्रीसीताराम- वैदिकादर्शसंस्कृतमहाविद्यालयः, पश्चिमबङ्गः। २. एकलव्यपरिसरः, अगरतला। ३. श्रीसदाशिवपरिसरः, ओडिशा। ४. लक्ष्मीदेवी- शराफ- आदर्शसंस्कृतमहाविद्यालयः, झाड़खण्डः। ५. राजकुमारी- गणेशशर्मा- संस्कृतविद्यापीठम्, विहारः। ६. श्रीस्वामी- पराङ्कुशाचार्य- आदर्शसंस्कृतमहाविद्यालयः, बिहारः। ७. कलियाचक- विक्रमकिशोर- आदर्श- संस्कृत- महाविद्यालयः, पश्चिमबङ्गः। ८. डॉ. रामजीमेहता- आदर्शसंस्कृतमहाविद्यालयः, बिहारः। १०. श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्, बिहारः। ११. श्रीराधामाधव- आदर्शसंस्कृतमहाविद्यालयः, मणिपुरम्। १२. भारतीचतुष्पाठी- संस्कृतमहाविद्यालयः, पश्चिमबङ्गः। १४. सरस्वती- आदर्शसंस्कृतमहाविद्यालयः, बिहारः।

युवमहोत्सवोऽयं द हेरिटेज ग्रुप ऑफ इंस्टीट्यूशंस, कोलकाता इत्यस्मिन् संस्थाने ६-८ जनवरी २०२६ दिनाङ्केषु साडम्बरं समनुष्ठितः। कार्यक्रमस्यास्य समन्वयकाः डॉ. कौशिकमालाकारमहाभागाः, सहसमन्वयकाः डॉ. शन्तनुकुमारचक्रवर्त्तीमहाभागाः विशिष्टं दायित्वं पालितवन्तः। विभिन्नादर्शमहाविद्यालयतः परिसरतश्च आहत्य त्रिशतं छात्राः छात्राश्च भागम् अगृह्णन्। मार्गदर्शकाः, मार्गदर्शिकाश्च छात्रैः सह समागता आसन्। तेषां वासव्यवस्था कोलकातास्थे विवेकानन्द- युवभारतीक्रीडाङ्गणे आसीत्। विशिष्टातिथीनां वासव्यवस्थापि तत्रैव कल्पिता। विशिष्टातिथीनां गमनागमनाय विशिष्टयानस्य व्यवस्था आसीत्। छात्राणां गमनागमनाय वासयानानि आसन्। एतेषु दिनेषु उत्तमभोजनस्य व्यवस्था अपि आसीत्। क्रीडाङ्गनम् आलोकमालाभिः, पताकाभिश्च सुशोभिता आसीत्। उद्घाटनकार्यक्रमे सम्मान्यातिथिरूपेण उपस्थिता आसन् रामकृष्णमिशन- विवेकानन्द- शैक्षणिक- शोधसंस्थानस्य प्रतिकुलाधिपतयः श्रद्धेयाः स्वामिनः आत्मप्रियानन्दमहाराजाः, संस्कृत- दर्शनविभाग- समन्वयकाः स्वामि- जपसिद्धानन्द- महाराजाश्च। विशिष्टातिथिरूपेण समुपस्थिता आसन् केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतयः आचार्याः श्रीनिवासवरखेड़ीमहाभागाः। उपस्थिता आसन् श्रीसीताराम- वैदिकादर्श- संस्कृत- महाविद्यालयस्य प्रबन्धनसमित्यध्यक्षाः प्रो. सुब्रह्मण्यशर्ममहाभागाः, प्राचार्याः डॉ. सोमेशकुमारमिश्रमहाभागाश्च। समागता आसन् केन्द्रीयसंस्कृतविश्वविद्यालयस्य छात्रकल्याणपरिषदध्यक्षाः प्रो. लीना शक्कर्वालमहोदयाः। केन्द्रीय- संस्कृत- विश्वविद्यालयस्य कुलसचिवचराः आचार्याः रञ्जितकुमारवर्मणमहाभागाः, शैक्षणिकाधिष्ठातारः डॉ. देवेन्द्रशुक्लमहाभागाः, एकलव्यपरिसरस्य आचार्यचराः प्रो. अवधेशकुमारचौबेमहाभागाश्च समुपस्थिता आसन्। अनेकेषाम् आदर्श- संस्कृत- महाविद्यालयानां प्राचार्याः, प्रबन्धनसमित्यध्यक्षा अपि समागता आसन्। केन्द्रीय- संस्कृत- विश्वविद्यालयस्य ग्रन्थालयाध्यक्षचराः डॉ. शुक्लामुखार्जीमहोदयाश्च समुपस्थिता आसन्। उद्घाटनसत्रस्य सञ्चालनं डॉ. शङ्खशुभ्रगच्छितमहाभागाः अकुर्वन्। ध्वजारोहणेन, वैदिकमन्त्रोच्चारणेन, राष्ट्रगीतेन, कुलगीतेन च अयं कार्यक्रमः समारब्धः। विशिष्टातिथीनां भाषणं रोमहर्षकं युवकानां कृते ऊर्जावर्धकं च आसीत्। त्रिषु दिनेषु शैक्षणिकस्पर्धाः क्रीडास्पर्धाश्च संघटिताः। क्रीडास्पर्धासु हेरिटेज इति संस्थायाः क्रीडाध्यापकाः निर्णायकाः आसन्। शैक्षणिकस्पर्धासु केन्द्रीयसंस्कृतविश्वविद्यालयस्य अध्यापकाः, अन्यविश्वविद्यालयीयाध्यापकाश्च निर्णायकाः अभवन्। हेरिटेज इति संस्थायां कर्मरतः सुनीलमहाभागाः उत्तमां व्यवस्थां सम्पादितवन्तः। तेषाम् उत्तमपरियोजनया सोत्साहं छात्राः स्पर्धासु भागम् अगृह्णन्।

समापनसत्रे विशिष्टातिथिरूपेण समुपस्थिता आसन् आदर्शसंस्कृतमहाविद्यालयानां मुख्याधिकारिणः आचार्याः कुलदीपशर्ममहाभागाः। हेरिटेज इति संस्थायाः प्रबन्धनाध्यक्षाः श्रीसन्तोषकुमाररयमहाभागाः, श्रीसीताराम- वैदिकादर्श- संस्कृत- महाविद्यालयस्य प्राचार्यचरणाः डॉ. सोमेशकुमारमिश्रमहाभागाश्च। वेदमन्त्रोच्चारणेन, राष्ट्रगीतेन, कुलगीतेन कार्यक्रमः समारब्धः। प्राचार्याः अतिथीनां स्वागतं सत्कारं च कृतवन्तः। कार्यक्रमस्य सञ्चालका आसन् शान्तिघोषमहाभागाः। डॉ. ख्यालानन्दमहाभागाः हिन्द्यामपि कार्यक्रमस्य अनुवदनम् अकुर्वन्। विशिष्टातिथीनां भाषणात् परं छात्रेभ्यः उपायनानि प्रदत्तानि। डॉ. शान्तनुकुमारचक्रवर्त्तीमहाभागाः, डॉ, कौशिकमालाकारमहाभागाश्च पुरस्कारघोषणं कृतवन्तः। सर्वाधिकम् अङ्कं प्राप्य विजयवैजयन्तीं प्राप्तवन्तः एकलव्यपरिसरस्य छात्राः। उपविजेतृषु प्रथमस्थाने आसन् श्रीसदाशिवपरिसरस्य छात्राः, द्वितीयस्थाने च कलियाचक- विक्रमकिशोर- आदर्शसंस्कृतमहाविद्यालयस्य छात्राः। पुरस्कारप्रदानान्ते सर्वेऽपि छात्राः स्वीयमार्गदर्शकैः सह सामूहिकं चित्रं गृहीतवन्तः। छात्राः सम्भूय नृत्यमपि कृतवन्तः। एवं सर्वेऽपि महान्तम् आनन्दम् अन्वभूवन्। आयोजकसंस्थानस्य श्रीसीताराम- वैदिकादर्श- संस्कृतमहाविद्यालयस्य अध्यापकाः कर्मकराः सेवाव्रतिनश्च कार्यक्रमस्यास्य साफल्याय आरात्रं श्रमम् अकुर्वन्। तत्र प्राचार्यवर्याणां दृढ़संकल्पः प्रेरणं च कार्यक्रमस्यास्य साफल्यकारणभूतम्। समन्वयकानाम् आचार्याणां कौशिकमालाकारमहाभागानां मार्गदर्शनम् अपि अत्र स्मरणार्हम्। उपप्राचार्याणां डॉ. राजेश्वरद्विवेदीमहाभागानां सप्रेम मार्गदर्शनं कार्यदक्षता च अस्य कार्यक्रमस्य साफल्यबीजभूता अस्ति। सुवीरव्यानार्जीमहोदयः, सरितामहापात्रमहोदया, सुचरितामहोदयाश्च आरात्रं परिश्रम्य कार्यक्रममिमं सफलामासुः। जयश्रीभट्टाचार्यमहोदयाः आवश्यकसामग्रीणां संरचने, विविधपत्रप्रस्तुतौ, प्रमाणपत्रलेखने च विशिष्टं दायित्वम् आपलयन्। अतिथीनां यातायातार्थं यानानां व्यवस्थापकाः आसन् डॉ. शङ्खशुभ्रगच्छितमहाभागाः। छात्रेभ्यः उत्तमं भोजनं उत्तमसेवां च प्रदातुं दृढसंकल्पा आसन् डॉ. शुभेन्दुघोषमहाभागाः, श्रीसुमितकुमारनन्दीमहाभागाः, डॉ. ख्यालानन्दमहाभागाश्च। डॉ. लोकनाथदासमहाभागाः छात्राणां यातायातव्यवस्थायां मार्गदर्शका आसन्। वन्दनाव्यानार्जीमहोदया, डॉ. गौरीभट्टाचार्यमहोदया च अतिथीनां वरणम् अकुर्वन्। देवकुमारच्याटार्जीमहोदयः, दिलीपकुमारदेमहोदयः तपननस्करमहोदयश्च अतिथीनां सत्कारकर्मणि नैपुण्यम् अदर्शयन्। एते सर्वेऽपि धन्यवादार्हाः। कार्यक्रमेऽस्मिन् स्वेच्छासेवकानां महती भूमिका आसीत्। एवं सर्वेषां मिलितसाहाय्येन कार्यक्रमस्य गुणवत्ता अवर्धत। अनेन महाविद्यालयस्य नामापि भारते सर्वत्र प्रथितम् अभवत्।

# गाजोल-महाविद्यालये अन्तरराष्ट्रीय-संगोष्ठी मानव-प्रकृति-सम्बन्धस्य दार्शनिक- साहित्यिक्-अन्वेषणम्




**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः, गाजोल, मालदा**

मानवस्य प्रकृत्याः सह अन्तःसम्बन्धस्य दार्शनिक- पर्यावरणीय साहित्यिकदृष्ट्या विश्लेषणं कर्तुं गाजोल- महाविद्यालयेन द्विदिवसीय- अन्तरराष्ट्रीय- संगोष्ठी आयोजिता आसीत्। १०– ११ जनवरी २०२६ तमे दिनाङ्के महाविद्यालयपरिसरे आयोजितस्य अस्याः संगोष्ठ्याः विषयः आसीत्- "मानव–प्रकृति-सम्बन्धः- दार्शनिक, पर्यावरणीय तथा साहित्यिक- अन्वेषणम्"। गाजोल- महाविद्यालयस्य दर्शनविभागः भूगोलविभागः बाङ्लाविभागः शिक्षाविज्ञानविभागः, संस्कृतविभागस्य संयुक्ततत्त्वावधानेन आयोजिते अस्मिन् कार्यक्रमे देशविदेशस्य विभिन्न- विश्वविद्यालयेभ्यः आगताः विशिष्टाः प्राध्यापकाः अनुसन्धानकर्तारः शिक्षाविदश्च सहभागितां गृहीतवन्तः। द्वितीयदिवसे मुख्यातिथिरूपेण उपस्थितः आसीत् रायगञ्ज- विश्वविद्यालयस्य माननीयः उपकुलपतिः प्रो. डॉ. दीपककुमाररायः। सः स्वीयभाषणे वर्तमान-पर्यावरण-सङ्कटस्य सन्दर्भे मानव- प्रकृति-सह-अस्तित्वस्य नैतिकदायित्वे विशेषं महत्त्वं प्रतिपादितवान्। अस्मिन् कार्यक्रमे उपस्थिताः आसन्- गाजोल- महाविद्यालयस्य प्राचार्यः डॉ. मनोजकुमारभोजः, सेमिनारस्य कन्भेनरः डॉ. निरङ्कुश-चक्रवर्ती, IQAC समन्वयकः डॉ. महम्मद निजाइरुल इस्लामः, तन्मयसरकारः, डॉ. अमरचन्द्रकर्मकारः, देवव्रतमण्डलः, डॉ. अनिमेषमण्डलः च अन्ये च। विशिष्टातिथिरूपेण विशिष्टवक्तृभिः रूपेण उपस्थिताः आसन्- गौड़बङ्ग- विश्वविद्यालयस्य पूर्व- कला- अनुषदस्य डीनः प्रो. साधनकुमारसाहः, दर्शनविभागस्य विभागाध्यक्षः प्रो. सुकुमारचन्द्ररायः, प्रो. प्रदीपचौहानः। अत्र वक्तृत्वं कृतवन्तः- थाइलैण्डदेशस्य शिनावात्रा- विश्वविद्यालयस्य जुली- सिमन- माकारिओला, फिलिपिन्स-देशस्य डी- ला- साल- विश्वविद्यालयस्य डॉ. जिनेट ई. परेनो तथा सऊदी-अरबदेशस्य तानाजिब गैस पावर प्लाण्टस्य डिविजन- एक्सिक्युटिव सेक्रेटरी लाजारो एस. मैकाटाङ्गायः। अन्ये अपि सहभागिनः आसन्- डॉ. सुदीप्ताताराफदारः, रायगञ्ज-विश्वविद्यालयस्य संस्कृतविभागस्य प्राध्यापकः डॉ. प्रशान्तकुमारमहाला, डॉ. तपसपलः च। अत्र पर्यावरण- नैतिकता, जलवायुपरिवर्तनं, पर्यावरणसङ्कटं बाङ्लासाहित्ये प्रकृतिचेतना, स्थायीविकासः, पर्यावरण- न्यायः इत्यादिषु महत्वपूर्णेषु विषयेषु विस्तृतं चर्चां कृतम्। अनुसन्धानपत्र-प्रस्तुतीकरणेन अन्तर- विभागीय- अनुसन्धानस्य, ज्ञानविनिमयस्य एकः मुक्तः मञ्चः निर्मितः। आयोजकैरुक्तं यत् एतादृशाः अन्तरराष्ट्रीय-संगोष्ठ्यः छात्रेषु अनुसन्धानकर्तृषु पर्यावरणचेतनां वर्धयन्ति मानवीय-मूल्यबोधस्य निर्माणे महत्त्वपूर्णां भूमिकां वहन्ति। सफलेन सार्थकेन च आयोजननेन गाजोलमहाविद्यालयः पुनरपि स्वस्य शैक्षणिक- उत्कर्षस्य परिचयं दत्तवान्। अस्मिन् कार्यक्रमे शताधिकाः प्राध्यापकाः, अध्यापिकाः, शिक्षकाः, अनुसन्धानकर्तारः, छात्राछात्राश्च सहभागिनः अभवन्।

# "पञ्चमहायज्ञः"

वैदिकपरम्परायां पञ्चमहायज्ञानाम् अतीव महत्वपूर्णं स्थानमस्ति। प्रत्येकं गृहस्थं प्रति पञ्चमहायज्ञानामनुष्ठानम् अत्यावश्यकमस्ति। पञ्चमहायज्याः ब्रह्म- पितृ- देव- भूत- नृयज्ञश्च अस्ति। यः पञ्चमहायज्ञ न क्रियते सः गृहस्थः जीवन्नपि मृतक एव। एतेषु पञ्चमहायज्ञेषु अध्ययनाध्यापनस्तु ब्रह्मयज्ञः, तर्पणादिकं पितृयज्ञः, देवाणां प्रीत्यर्थं कृतः होमः देवयज्ञः, भूतबलिस्तु भूतयज्ञः, अतिथिपूजनं नृयज्ञः भवति। यः पुरुषः देवानाम्, अतिथिनां, भृत्यानां, पितृणाम्, आत्मनश्च तोषकारान् इमान् यज्ञान् न सम्पादयति सः जीवन्नपि मृतः एव।

**डॉ.वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**

# स्वामीविवेकानन्द- कनिष्ठमहाविद्यालये १२ दिनाङ्के प्रेरणादायकं व्याख्यानम्

**हिमसंस्कृतवार्ताः- अर्जुन शास्त्री जलगावः- महाराष्ट्रम्।**



खान्देश– कॉलेज– एज्युकेशन– सोसायटी इत्यस्य सञ्चालनेन प्रवर्तिते मू. जे. महाविद्यालयस्य अन्तर्गते स्थिते स्वामीविवेकानन्द- कनिष्ठ- महाविद्यालये महापुरुषस्य राष्ट्रप्रेरकस्य च स्वामीविवेकानन्दस्य जयन्तीनिमित्तं मङ्गलवारे, दिनाङ्के १२ जनवरीमासे, प्रातः ११.३० वादने विशेषं व्याख्यानम् आयोजितं भविष्यति।युवकानां सर्वाङ्गीणविकासे स्वामीविवेकानन्दस्य विचाराणां महत्त्वं दृष्ट्वा एषा व्याख्यानमाला द्वितीयवर्षेऽपि अनवरतं आयोज्यते। अस्मिन् वर्षे प्रसिद्धः चिन्तकः विद्वान् च डा ॅ. परागः जहागीरदारः "स्वामीविवेकानन्दः च अद्यतनः युवकः" इति विषयं आधारं कृत्वा विद्यार्थिभ्यः मार्गदर्शनं करिष्यति। अद्यतनस्य स्पर्धात्मकयुगे युवकैः कथं स्वामीविवेकानन्दस्य आदर्शान् आत्मसात् कृत्वा व्यक्तित्वविकासः, आत्मविश्वासः, चारित्र्यनिर्माणं, राष्ट्रनिष्ठा च साधयितुं शक्यते, इत्यादिषु विषयेषु सः प्रकाशं प्रक्षेप्स्यति। गतवर्षे अस्याः व्याख्यानमालायाः अन्तर्गतं डा. उदय कुमठेकरः (नांदेड्) इत्यनेन "स्वामीविवेकानन्दविचाराणां समकालीनोपयोगिता" इति विषये गम्भीरं प्रभावशालिनं च व्याख्यानं कृतम् आसीत्। तस्मिन् समये विद्यार्थिनाम् अध्यापकवर्गस्य चापि उत्तमः प्रतिसादः प्राप्तः। एतस्य व्याख्यानस्य माध्यमेन विद्यार्थिषु राष्ट्रभक्तेः, आत्मगौरवस्य, चारित्र्यसंवर्धनस्य सामाजिकचेतनायाश्च विकासः स्यात्, इति मुख्योद्देश्यः अस्ति। अतः अस्य कार्यक्रमस्य लाभम् अधिकाधिकं विद्यार्थी गृह्णन्तु, इति आवाहनं महाविद्यालयस्य प्राचार्यः डा. सं. ना. भारंबे, उपप्राचार्यः प्रा. आर. बी. ठाकरे, प्रा. स्वाती बऱ्हाटे , प्रा. उमेशः पाटीलः, प्रा. गणेशः सूर्यवंशी इत्येतेन कृतम्।

# शिक्षणक्षेत्रे उल्लेखनीयस्य योगदानस्य हेतुना प्राध्यापकः डॉ. चिरागः हेमन्तकुमारः पुरोहितः विशेषसम्मानेन पुरस्कारैश्च अलङ्कृतः



पालनपुरस्थितया स्कूल् ऑफ् साइन्स इत्याख्यया संस्थया तथा नॉलेज् वैली फाउण्डेशन इत्यनेन सहयोगेन राज्ये गुणवत्तायुक्तस्य आधुनिकशिक्षणस्य प्रोत्साहनार्थं "गुजरात् सारस्वतसम्मानः स्नेहमिलनं च – २०२६" इति भव्यः कार्यक्रमः आयोजिम्। अस्मिन् कार्यक्रमे Gujarat Teachers' Association for Quality Education इत्यस्य सौजन्येन शिक्षणक्षेत्रे उल्लेखनीयस्य योगदानस्य हेतुना जय जलाराम आयुर्वेदिक मेडिकल कॉलेज, शिवपुरी–गोधरा इत्यत्र कार्यरतः प्राध्यापकः डॉ. चिरागः हेमन्तकुमारः पुरोहितः विशेषसम्मानेन पुरस्कारैश्च अलङ्कृतः। डॉ. पुरोहितेन आयुर्वेदे, संहिता-सिद्धान्ते तथा संस्कृतविषये अध्यापनक्षेत्रे समर्पितं शैक्षणिकं कार्यं, अनुसन्धानगताः प्रवृत्तयः, तथा विद्यार्थिनां सर्वाङ्गीणविकासाय कृताः प्रशंसनीयाः प्रयत्नाः एते सर्वे दृष्ट्वा तस्मै एषः सम्मानः प्रदत्तः। अस्मिन् शुभावसरे शिक्षणक्षेत्रे संलग्नाः विद्वांसः अध्यापकाः, शिक्षणविदः तथा गण्यमान्याः महापुरुषाः विशेषतया उपस्थिता आसन्।कार्यक्रमस्य अन्तेस्नेहमिलनप्रसङ्गेनसर्वैः शुभाशीर्वादाः शुभेच्छाश्च व्यक्ताः। अनेन सम्मानेनमहाविद्यालयपरिवारस्य तथा आयुर्वेदिकशिक्षणक्षेत्रस्य च हर्षगौरवभावः सर्वत्र प्रसारितः।

# स्वामीविवेकानन्दः : व्यक्तित्वं कृतित्वं च (जन्म12-02-1863-मृत्यु:04/07/1902) (राष्ट्रिययुवादिवसः,जयंती विशेषः-12 जनवरी)














## डॉ विमलेश झा, डीएवी पब्लिक स्कूल बरारी, भागलपुर,बिहार


भारतीयसंस्कृतेः आध्यात्मिकक्षेत्रे, आधुनिकभारतस्य बौद्धिकजागरणे, विश्वमानवसमाजस्य आध्यात्मिकैक्यचिन्तने च स्वामी विवेकानन्दस्य स्थानं अत्यन्तं गौरवपूर्णं वर्तते। सः केवलं संन्यासी नासीत्, केवलं दार्शनिको नासीत्, अपि तु सः युगनिर्माता, राष्ट्रचेतनायाः प्रेरकः, मानवसेवायाः साक्षात् प्रतिमूर्तिः आसीत्। तस्य व्यक्तित्वे तेजः, करुणा, साहसम्, बुद्धिः, वैदिकदर्शनादीनि च अद्भुतरीत्या एकत्र समन्वितानि आसन्।

स्वामी विवेकानन्दः भारतस्य प्राचीनवैदिकपरम्परायाः आधुनिकव्याख्याता आसीत्। सः वेदान्तदर्शनस्य उपयोगः जनानां जीवनव्यवहारे कृतवान् । तस्य जीवनं तस्य कृतित्वं च भारतीययुवकानां कृते दीपस्तम्भवत् अद्यापि प्रकाशते।

स्वामी विवेकानन्दस्य जन्म 1863 तमेवर्षे जनवरीमासस्य 12दिनांके बंगप्रदेशस्य कोलकातानगरे अभवत्। तस्य पूर्वनाम नरेन्द्रनाथ दत्तः आसीत्। पिता विश्वनाथदत्तः प्रसिद्धः अधिवक्ता आसीत्, येन तस्मै तर्कशक्तेः, निर्भीकतायाः च बीजानि दत्तानि। माता भुवनेश्वरीदेवी धार्मिकभावनया, करुणया, साहसेन च सम्पन्ना आसीत्, यया नरेन्द्रनाथस्य हृदये भक्तिः, संवेदनशीलता च आरोपिता। बाल्यकालादेव नरेन्द्रनाथः तीक्ष्णबुद्धिः, निर्भीकः, सत्यनिष्ठः च आसीत्। बाल्ये एव तस्य मनसि एकःप्रश्नःआसीत्— "ईश्वरः अस्ति वा?" इति । एषः प्रश्नः एव तस्य सम्पूर्णजीवनस्य मार्गदर्शकः अभवत्। नरेन्द्रनाथः कोलकातानगस्य स्कॉटिश् चर्च कॉलेज् इत्यत्र अध्ययनम् अकरोत्। तत्र सः पाश्चात्यदर्शनं, विज्ञानं, इतिहासं, तर्कशास्त्रं च गभीरतया अधीतवान्।जान स्टुअर्ट मिल्, डेविड ह्यूम, हर्बर्ट स्पेन्सर् इत्यादीनां दार्शनिकानां विचाराः तस्य मनसि प्रभावं स्थापितवन्तः। किन्तु पाश्चात्यदर्शनैः सः अन्तःकरणस्य शान्तिं न प्राप्तवान्। तस्मात् कारणात् सः भारतीययोगिनः, साधकान् , दार्शनिकान् च अन्वेष्टुं प्रवृत्तः अभवत् । तस्य प्रश्नः एक एव आसीत्— "कश्चन ईश्वरं प्रत्यक्षतया दृष्टवान् अस्ति वा?"

ईश्वरस्य अन्वेषणे नरेन्द्रनाथस्य मेलनं दक्षिणेश्वरस्थेन श्रीरामकृष्णपरमहंसेन सह अभवत् । तस्य जीवनस्य एषा एव महत्तमा घटना आसीत्। रामकृष्णपरमहंसः सरलः, अल्पशिक्षितः, किन्तु ईश्वरानुभूतिसम्पन्नः महापुरुषः आसीत्।

रामकृष्णः नरेन्द्रनाथस्य प्रश्नस्य उत्तरं न शब्दैः, अपि तु अनुभूत्या दत्तवान्। सः अवदत्— "अहं ईश्वरं तथैव पश्यामि, यथा अहं त्वां पश्यामि।" एतत् वाक्यं नरेन्द्रनाथस्य जीवनं परिवर्तितम्।

रामकृष्णस्य सान्निध्ये नरेन्द्रनाथः अद्वैतवेदान्तस्य रहस्यानि, भक्तियोगस्य माधुर्यं, कर्मयोगस्य महत्त्वं च अनुभूतवान्। गुरुकृपया सः संशयात् श्रद्धां, तर्कात् अनुभूतिं, अहंकारात् आत्मज्ञानं प्रति अगच्छत्। संन्यासदीक्षां प्राप्य नरेन्द्रनाथस्य "विवेकानन्द" इति नवीननामकरणम् अभवत् । "विवेक" इति शब्दः नित्यानित्यवस्तुविवेकं सूचयति, "आनन्द" इति आत्मानन्दं बोधयति। अनेन नाम्ना एव तस्य जीवनस्य लक्ष्यं सूचितम्— विवेकपूर्णं आध्यात्मिकजीवनं, यत् आनन्दस्य मूलम् अस्ति।

संन्यासग्रहणानन्तरं स्वामी विवेकानन्दः सम्पूर्णभारतदेशस्य पदयात्राम् अकरोत् । हिमालयात् कन्याकुमारीपर्यन्तं सः ग्रामेषु, नगरेषु, पर्वतेषु, वनप्रदेशेषु च विचरन् भारतमातुः वास्तविकस्थितिं दृष्टवान्।

एतस्यां यात्रायां सः भारतीयजनानां दारिद्र्यं, अज्ञानं, सामाजिकदुर्दशां च अवलोक्य अत्यन्तं दुःखितः अभवत्। सः अवदत्— "दरिद्रनारायणसेवा एव ईश्वरसेवा वर्तते।" एषा भावना तस्य कर्मयोगदर्शनस्य मूलाधारः अभवत्। स्वामिनः दृष्टौ भारतदेशस्य पतनकारणं आध्यात्मिकदौर्बल्यं न, अपि तु आत्मविश्वासस्य अभावः आसीत्। अतः सः भारतीययुवकान् उद्दिश्य अवदत्— "उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।"

स्वामीविवेकानन्दस्य जीवनस्य विश्वप्रसिद्धा घटना 1893 थमे वर्षे अमेरिकादेशस्य शिकागोनगरे आयोजितायां विश्वधर्ममहासभायां तस्य भाषणम् आसीत्। तस्य भाषणस्य प्रारम्भः एव इतिहासप्रसिद्धः विद्यते— "Sisters and Brothers of America" इति सम्बोधनं श्रुत्वा सभास्थले उपस्थिताः जनाः करतलध्वनिभिः तं अभिनन्दितवन्तः।

तस्मिन् भाषणे सः हिन्दुधर्मस्य उदारता, सर्वधर्मसमभावः, वेदान्तस्य सार्वभौमिकता च विश्वसमक्षे प्रतिपादितवान्। सः अवदत्—"एकं सद्विप्राः बहुधा वदन्ति।" एतेन भाषणेन भारतदेशस्य आध्यात्मिकगौरवं पुनः प्रतिष्ठापितं जातम्, पाश्चात्यजगतः भारतदेशं नवीनदृष्ट्या अवलोकयितुं प्रारब्धवन्तः। शिकागोभाषणानन्तरं स्वामीविवेकानन्दः अमेरिका, इंग्लैण्ड्, फ्रान्स इत्यादिषु देशेषु वेदान्तदर्शनस्य प्रचारं कृतवान्। तत्र एषः वेदान्तसंघान् स्थापयामास, व्याख्यानानि दत्तवान्, शिष्यपरम्परां च निर्मितवान्। एतस्य उपदेशेषु अद्वैतवेदान्तः, कर्मयोगः, भक्तियोगः, राजयोगः च समन्वितरूपेण आसन् । एषः धर्मं केवलं आचाररूपेण न, अपि तु जीवनदर्शनरूपेण शिक्षितवान्। 1897 तमे वर्षे एषःरामकृष्णमिशन इत्यस्याः संस्थायाः स्थापनाम् अकरोत् । अस्य मिशनस्य आदर्शवाक्यं आसीत्—"आत्मनो मोक्षार्थं जगद्धिताय च।" रामकृष्णमिशनसंस्था आध्यात्मिकसाधनया सह सामाजिकसेवायाः अनुपमः समन्वयः अस्ति। शिक्षाप्रसारः, चिकित्सासेवा, आपद्सहायता, नारीशिक्षा, युवकोद्धारः एतानि सर्वाणि कार्यक्षेत्राणि अस्याःसंस्थायाः मुख्योद्देश्यानि सन्ति।

## स्वामीविवेकानन्दः

### बहुमुखीप्रतिभासम्पन्नः आसीत्।

### एषः

### ओजस्वीवक्ता,गभीरदार्शनिकः,

### करुणासागरः,राष्ट्रभक्तः

युवानां प्रेरणास्रोतः च आसीत्। एतस्य वाणी अग्निवत् तेजस्विनी आसीत्, किन्तु हृदयम् करुणया पूर्णम् आसीत्। एषः शिष्यैः सह मित्रवत्, गुरुभिः सह भक्तवत्, जनसामान्यैः सह सेवकवत् व्यवहरति स्म। स्वामीविवेकानन्देन बहवः ग्रन्थाः, उपदेशाः, भाषणसंग्रहाः च रचिताः तेषु प्रमुखाःकर्मयोगः , राजयोगः ,भक्तियोगः,ज्ञानयोगः प्रबुद्धभारत (पत्रिका) आदयः सन्ति। एते ग्रन्थाः अद्यापि आध्यात्मिकसाधकानां मार्गदर्शकाः सन्ति। हा हन्त! अल्पे वयसि एव 1902 तमे वर्षे जूलाईमासस्य 4दिनांके एषः महापुरुषः शरीरत्यागं कृतवान् । नवत्रिंशत्वर्षीयः अल्पायु एव एषः अस्मान् विहाय गतः, किन्तु तस्य विचाराः, कार्याणि, प्रेरणा च अनन्तकालं यावत् स्थास्यन्ति एव।

सः सत्यमेव उक्तवान् आसीत् यत् """मम जीवनं न, मम विचाराः कर्माणि च मम मृत्योःअनन्तरमपि अनन्तकालं यावत् जीवितानि स्थास्यन्ति।" एषः न केवलं भारतस्य गौरवः, अपि तु सम्पूर्णमानवजातेः प्रेरणास्रोतः आसीत्। एतस्य व्यक्तित्वं आत्मविश्वासस्य, करुणायाः, विवेकस्य च आदर्शरूपम् अस्ति।

स्वामीविवेकानंदस्य जन्मदिवसः भारतसर्वकारेण 1984 ख्रिष्टाब्दात् राष्ट्रिययुवादिवसरूपेण आचर्यते। अतः अत्र वयं वक्तुं शक्नुमो यत्— स्वामी विवेकानन्दः भारतस्य आत्मा, युगस्य वाणी, मानवतायाः पथप्रदर्शकः च आसीत्।